International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 21-24
© 2020 IJSR
www.anantaajournal.com
Received: 16-11-2019
Accepted: 20-12-2019

**डॉ. जयकृष्ण**
सहायकाचार्यः, व्याकरणम्
वेदविज्ञानपरम्पराविभागः,
चिन्मय-विश्वविद्यापीठम्,
आदिशङ्करनिलयम्,
आदिशङ्करमार्गः, वेलियानाड्,
एरणाकुलम् (कोच्चि), केरलम्,
भारत

**Corresponding Author:**
**डॉ. जयकृष्ण**
सहायकाचार्यः, व्याकरणम्
वेदविज्ञानपरम्पराविभागः,
चिन्मय-विश्वविद्यापीठम्,
आदिशङ्करनिलयम्,
आदिशङ्करमार्गः, वेलियानाड्,
एरणाकुलम् (कोच्चि), केरलम्,
भारत

# भट्टलक्ष्मीधरस्य चक्रपाणिविजयम् इति महाकाव्ये कतिपयकृदन्तप्रयोगाणां व्याकरणदृष्ट्या परिशीलनम्

**डॉ. जयकृष्ण**

**सारांश:**
चक्रपाणिविजयम् इति महाकाव्यम् महाकविना भट्टलक्ष्मीधरेण विरचितम् अस्ति। अयं कविवरः महाराजस्य भोजस्य सभायाम् प्रसिद्धेषु कविषु अन्यतमः आसीत्। अस्य चक्रपाणिविजयम् इति कृतिः विंशत्या सर्गैः विलसति। कवीनां हि प्रयोगाः भवन्ति विशिष्टाः इति अध्येतृभिः ज्ञायते एव काव्यानाम्। तत्र बहुत्र बहुविधरीत्या अर्थसङ्गतिः भवति कर्तव्या। तत्रैव च व्याकरणात् ऋते काव्यावगमनं तु दुःशकमेव। पञ्चमहाकाव्यादिषु मल्लीनाथादिभिः महदेव लोकोपकारकं कार्यं कृतं वर्तते इति न कस्यापि अज्ञातं संस्कृतलोकस्थस्य। तत्र इतरेषु अपि महाकाव्येषु शब्दगता स्पष्टता आवश्यकी अस्ति इति कृत्वा चक्रपाणिविजयम् इति महाकाव्यम् आदाय व्याकरणं पुरस्कृत्य चिन्तनं कर्तुं कश्चन यत्नः अत्र विधीयमानः अस्ति शोधप्रबन्धे। तत्रास्मिन् लेखे तावत् कतिपयानां कृदन्तविचाराणाम् एव सङ्ग्रहः अकारि।

**मुख्य-शब्दाः** शुक्, आध्मायित, आध्मायित, सङ्कोचपूर्वोत्पतितेन, पथातिथि, कुसुमंधय

## प्रस्तावना

### शुक् इत्यत्र क्विपः सङ्गतिः –

दीक्षावतः सोमपरिग्रहार्थमभ्यागते यस्य सदा सुरेन्द्रे।
शची शुचैवाश्रुजलं मुमोच व्याजो बभूवाध्वरधूमखेदः[1] ॥

दीक्षावतः यस्य (बलेः) सोमपरिग्रहार्थं सुरेन्द्रे सदा अभ्यागते शची शुचा एव अश्रुजलं मुमोच इत्याद्येवं क्रमेण अन्वयः।

श्लोके प्रयुक्तस्य शुचा इति पदस्य प्रकृते कः अर्थः ग्राह्यः इति जिज्ञासा जायते। यः / या शोचति सः / सा शुक्, अथवा शोचः एव शुक् इत्यपि अर्थः भवति। तथाहि – 'क्विप्च[2]' इत्यनेन शुच्–धातोः कर्तरि विहितत्वात्तु यः / या शोचति सः / सा शुक् इति अर्थः स्यात्। परन्तु प्रकृते कर्त्रर्थे शुचा इति प्रयुक्तं न भासते। एवं तर्हि कथमत्र क्विब्वक्तव्यः इति चेत् – 'सम्पदादिभ्यः क्विप[3]' इत्यनेन शुच्–धातोः क्विप् भावे वाच्यः। तथाहि वार्तिकार्थः दृ भावे कर्तरि च कारके सम्पदादिगणे पठितेभ्यः क्विप् स्यात्। एवं क्रियमाणे शुचा इत्यस्य शोकेन इत्याद्यर्थलाभः भवेत्। यद्यपि सर्वत्र सम्पदादिगणे सम्पद्, विपद्, आपद्, प्रतिपद्, परिषद् इत्येते एव शब्दाः दृश्यन्ते तथापि गणस्य अस्य आकृतित्वम् मत्वा शुच–धातुं च तत्र अन्तर्भाव्य प्रकृते भावे क्विपा सङ्गतिः वक्तव्या इति

चिन्त्यते। अत एव अमरकोशस्य रामाश्रम्याम् एतच्छब्दव्याख्यानावसरे भानुजिदीक्षितः अपि सम्पदादित्वादेव क्विपं वदति।

## कथम् आध्मायित इति?

यत्रोदिते दातरि कामधेनोः कामेषु लोकैरवधीरितेषु।
मन्दानि जातानि पदानि नूनमाध्मायितापीनविसंस्थुलानि[4] ॥

यत्र दातरि उदिते लोकैः कामेषु अवधीरितेषु कामधेनोः आध्मायितापीनविसंस्थुलानि पदानि नूनं मन्दानि जातानि इत्येवम् अन्वयः।
अत्र आध्मायितापीनविसंस्थुलानि इत्यस्मिन् समस्तपदे आध्मायितानि च इमानि पीनविसंस्थुलानि इत्येवं विग्रहः प्रदर्श्यते। आध्मायितानि नाम स्फीतानि। अत्र आध्मायितानि इति पदे जिज्ञासा। यद्यत्र आङि उपसर्गे ध्मा–शब्दाग्निसंयोगयोः (सकर्मकः, अनिट्, परस्मैपदी) इति धातोः क्तान्तं रूपम् उच्येत तर्हि नेदं कथनं युज्येत, धातोरस्य अनिट्त्वधर्मात् तत्र क्तान्ते ध्मात इति रूपश्रवणाच्च। न चात्र ण्यन्तात् आध्मायित इति शब्दसाधुत्वं भ्रमणीयम् 'अर्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ'[5] इत्यनेन ध्मः आदन्तत्वात् पुगापत्तेः। णिचि पुकि आध्मापित इति स्यादित्यर्थः। कथं तर्हि प्रकृते आध्मायित इति रूपसाधुत्वं वाच्यम्? इति चेदुच्यते –
आदन्तात् ध्मा–धातोः उपसर्गे उपपदे अत्र 'आतश्चोपसर्गे[6]' इत्यनेन क–प्रत्ययः क्रियते। ततः आधमति इति आध्मः इति सिध्यति। ततः आध्म इव आचरति इत्यस्मिन् अर्थे 'कर्तुः क्यङ् सलोपश्च[7]' इत्यनेन क्यङ् इति प्रत्ययः। ततः 'आ ध्मा य' इत्यस्य 'सनाद्यन्ता धातवः[8]' इत्यनेन धातुसञ्ज्ञया आध्मायते इति रूपं सिद्धयेत्। अधुना अस्यैव आध्माय इति धातोः क्तान्तं रूपं आध्मायित इति दुर्वारं स्यात्। न चात्र आध्माय इत्यस्य ध्मा इति मूलधातोरिव अनिट्त्वं शङ्क्यम्, यतः निष्पन्नः सनाद्यन्तधातुरयम् अनेकाच्। इत्येवं क्रमेण व्युत्पाद्यमाने अपेक्षितार्थसङ्गत्यर्थन्तु धात्वनेकार्थत्वम् आङः च प्राक्प्रयोगः अत्र ग्राह्यः स्यात् इति प्रकृते साधुत्वकथनाय अस्माकं प्रयासमात्रमेव।

## कथं सङ्कोचपूर्वोत्पतितेन इति?

मुरारिणा वामनतानिभेन सङ्कोचपूर्वोत्पतितेन दूरम्।
द्यावापृथिव्यावपि लङ्घयित्वा न लङ्घितो यन्महिमा महीयान्[9] ॥

सङ्कोचपूर्वोत्पतितेन वामनतानिभेन मुरारिणा द्यावापृथिव्यौ लङ्घयित्वा महीयान् यन्महिमा न लङ्घितः इत्येवं क्रमेण अन्वयः।
अत्र श्लोके सङ्कोचपूर्वोत्पतितेन इत्यस्मिन् समस्तपदे पतितेन इत्यत्र जायते इडापत्तिः। तथाहि दृ पत्लृ–गतौ इति धातुः भौवादिकः, सकर्मकः, उदात्तेदिति सेट् च। धातोः धर्मः सेट्त्वं खलु! इत्यत एव श्लोके पतितेन इति प्रयुक्तम्। परन्तु पत्लृ–धातोः सन् इति प्रत्यये 'तनिपतिदरिद्रातिभ्यः सन इड्वा वाच्य[10]:' इति वार्तिकेन विकल्पेन इडागमः भवति। इडागमविकल्पः इति कारणात् निष्ठासञ्ज्ञके क्ते प्रत्यये परे अस्मात् धातोः इडागमः न भवति। तत्र 'यस्य विभाषा[11]' इत्यनेन निष्ठासञ्ज्ञके प्रत्यये परे इटः निषेधः उच्यते। तथा च सूत्रार्थः दृ यस्य कुत्रचित् विकल्पेन इड् विहितः ततः निष्ठायाम् इट् न स्यात् इति। एवं चेत् कथमत्र पतितेन इति क्तान्तं रूपं श्रूयेत इति चेत् प्रकृते इड्विधानोपायद्वयम् उच्यते। प्रथमतया तावत् दृ 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः[12]' इत्यत्र पठितः पतित इति शब्दः ज्ञापकः भवति सेट्त्वस्य। अपरतया तावत् 'सेऽसिचि कृतचृतच्छृदतृदनृतः[13]' इत्यनेन सूत्रेण कृ तचृतछृदतृदनृतः इत्येतेभ्यः धातुभ्यः परस्य सिज्भिन्नस्य सादेः आर्धधातुकस्य विकल्पेन इड् विधीयते। एवं चेत् उक्तसूत्रेण एव इटः विकल्पे सिद्धे कृती, चृती इत्यादिषु धातुषु ईदित्करणं व्यर्थं स्यात्। एषु धातुषु ईदित्करणं 'श्वीदितो निष्ठायाम्[14]' इत्यनेन इट् मा भवतु इत्येतदर्थं क्रियते। परन्तु स च इटः निषेधः सकारादौ आर्धधातुके परे विकल्पेन इड्विधानसामर्थ्यात् 'यस्य विभाषा' इत्यनेन एव सिद्धयति खलु! तेन प्रकृते धातुषु ईदित्करणं व्यर्थं स्यात्। अत एव एतत् ईदित्करणं व्यर्थं सत् ज्ञापयति यत् 'यस्य विभाषा' इति इटः निषेधः अनित्यः अस्ति इति। एतत् अनित्यत्वम् एव आश्रित्य पतितेन इत्यत्र पत्लृ–धातोः इडागमः सिद्धयति।

## पथातिथिः उत पथ्यतिथिः

निहत्य तानुद्धतबाहुदण्डकण्डूतिचण्डानथ निर्जगाम।
पथातिथीभूतभटास्थिभेदात् किरत्कृपाणज्वलनोज्वलेन[15] ॥

अथ उद्धतबाहुदण्डकण्डूतिचण्डान् तान् निहत्य पथातिथीभूतभटास्थिभेदात् किरत्कृपाणज्वलनोज्वलेन निर्जगाम इत्येवं क्रमेण अन्वयः।
श्लोके पथातिथीभूतभटास्थिभेदात् इत्यस्मिन् पदे अस्ति कश्चन विशेषः। तथा च – पथि अतिथिभूत.... इत्येवं प्रकारेण यदि विगृहीतं स्यात् तर्हि पथि इत्यत्र विद्यमानस्य पथिन् इति नान्तस्य शब्दस्य नकारलोपत्वात् पथ्यतिथीभूत.. .. इत्यादि श्रूयेत, प्रकृते नान्तस्य पथः टेर्लोपत्वात् प्रत्ययान्तरोत्पत्तेरभावात्। कथं तर्हि पथातिथीभूत... इत्यादि इति चेत्, पथ इति अकारान्तशब्दः पुंसि मार्गार्थे त्रिकाण्डशेषकारमते उच्यते। तत्र हि चुरादिस्थात् पथ–गतौ इत्यस्मात् घञर्थे अधिकरणे कः उच्यते कल्पद्रुमवाचस्पत्योः। तथाहि दृ पथन्ति अस्मिन् इति पथः। पथ–धातोः 'अकर्तरि च कारके सञ्ज्ञायाम्' इत्यत्रोक्त–घञर्थे 'घञर्थे कविधानम् ' इत्यनेन घञर्थः कः

इति प्रत्ययः विधीयते। ततश्च पथ इति शब्दस्य सिद्धिः। अतः कविना प्रयुक्तः विशिष्ट एष प्रयोगः पथातिथीभूतभटास्थिभेदात् इति। यदि छन्दसः नियमनाशः न स्यात् पथ्यतिथीभूतभटास्थिभेदात् इत्यपि प्रयोगः युक्तः तर्हि स्यात्।

**कथं कर्वुरित इति –**

कण्ठप्रभाकर्वुरिताट्टहासमिश्रैर्महोभिः फणिनां मणीनाम्।
रुद्रानपूर्वामरचापचित्रशरत्पयोदप्रतिमानपश्यत्[19] ॥

कण्ठप्रभाकर्वुरिताट्टहासमिश्रैः फणिनां मणीनां महोभिः अपूर्वामरचापचित्रशरत्पयोदप्रतिमान् अपश्यत् इत्येवम् अन्वयः।

अत्र कर्वुरित इति शब्दस्य व्युत्पत्तिविषये जिज्ञासा उत्पद्यते। कर्व–हिंसायाम् इत्यस्मात् 'मद्गुरादयश्च' इत्यनेन कुरचि कर्वुर इति सिद्धयति। ननु इतच् –प्रत्ययम् आश्रित्य कर्वुरित इति शब्दस्य निर्माणं यद्यपि शक्यते परन्तु कर्वुरः अस्य सञ्जात इति अर्थः प्रकृते नाभिप्रेतः। अतः प्रकारान्तरेण अत्र व्युत्पत्तिः आश्रयणीया। कर्वुर इव आचरति इत्यस्मिन् अर्थे 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' इत्यनेन क्विपि कर्वुर इत्यस्य नामधातुत्वात् क्त –प्रत्ययः कर्तव्यः। धातोरस्य अनेकाच्त्वात् सेट्त्वं तु भवत्येव। अतः कर्वुरित इति शब्दस्य इत्थमत्र व्यवस्था ज्ञेया।

**कथं कुसुमंधय इति –**

कौतुकोत्तरलकामिनीजनप्रेक्ष्यमाणतिलकप्रसाधिते।
श्मश्रुराजिसदृशी मुखे मधोरुल्ललास कुसुमंधयावली[26] ॥

कौतुकोत्तरलकामिनीजनप्रेक्ष्यमाणतिलकप्रसाधिते मधोः मुखे कुसुमंधयावली श्मश्रुराजिसदृशी उल्ललास इत्येवम् अन्वयः।

श्लोके कुसुमंधयावली इति पदं प्रयुक्तं वर्तते। कुसुमंधयानाम् आवली कुसुमंधयावली। प्रकृते को नाम कुसुमंधय इति जिज्ञासा जायते। तथाहि कुसुमं धयति इति कुसुमंधयः। धेट्–पाने इत्यस्मात् धयति इति क्रिया। नन्वत्र कुसुमस्य पानं कथं शक्यते इत्यपि जिज्ञासा जायते। भ्रमरस्तु तावत् कुसुमे विद्यमानं मकरन्दं पिबति। कथं तर्हि कुसुमं धयतीति चेत् लक्षणया अत्र कुसुमस्थितं मकरन्दं धयतीति अर्थबोधः कार्य्यः।

किञ्च पाणिनीयत्वं तु शब्दस्यास्य चिन्तनीयं स्यात्, यतः सूत्रकारःधेट्धातोः खश्–प्रत्ययंनासिका स्तन[27] इत्येतयोः कर्मणोः उपपदयोःनाडीमुष्ट्योश्च कर्मणोरुपपदयोरेव च विधत्ते। कुसुम इति उपपदे तु धेटः खश् न दृश्यते। कथं तर्हि कुसुमंधय इति कविना प्रकृते प्रायुञ्जि इति प्रश्नः उदेति।

अत्र कश्चन प्रयासः कवेः समर्थनाय अस्माभिः क्रियते। भाष्ये तावत् 'नासिकास्तनयोर्ध्माधेटोः' 'नाडीमुष्ट्योश्च' इति सूत्रद्वयव्याख्यावसरे 'अत्यल्पमिदमुच्यते'[29] इति न्यूनताप्रदर्शकभाष्यारम्भः कृतः। ततः न्यूनतापूरकवार्तिकम् आरब्धं 'नासिकानाडीमुष्टिघटीखारीष्विति वक्तव्यम्'[30]। एतेन तत्रैव घटींधमः,घटींधयः,खारिंधमः, खारिंधयः इत्यादीनि रूपाणि प्रदर्शितानि।

ननु सूत्रस्थायाः अल्पतायाः पूर्तिसमये अपि वार्तिके यद्यपि कुसुमशब्दस्य उपसङ्ख्यानं नैव दृश्यते। परन्तु 'अत्यल्पमिदमुच्यते' इति भाष्यवचनं मनसि निधाय वार्तिकस्थेषु परिगणितेषु सूत्रेतरशब्देषु कुसुमशब्दस्य अपि परिगणनं कुर्याम अनन्यगतिकतया। तथा क्रियमाणे कुसुमंधय इति प्रयोगस्य अपि साधुत्वं वक्तुं शक्यते।

**कथं त्रियामाविरमे इति?**

अथ त्रियामाविरमे मृगीदृशः कृतं महाश्चर्यमनार्यवेधसा।
सरोजिनीतुल्यविबुद्धयापि यत्कुमुद्वतीभिः सह खिन्नमेतया[31] ॥

अथ त्रियामाविरमे अनार्यवेधसा मृगीदृशः महाश्चर्यं कृतं यत् सरोजिनीतुल्यविबुद्धयापि एतया कुमुद्वतीभिः सह खिन्नम् इत्येवम् अन्वयः।

श्लोके अस्मिन् त्रियामाविरमे इति शब्दे अस्ति विशेषः। त्रियामायाः विरमः त्रियामाविरमः, तस्मिन्। त्रियामा नाम निशा इति। तथाहि 'त्रयो यामा यस्याः। आद्यन्तयोः अर्धयामयोः चेष्टाकालत्वेन दिनप्रायत्वात्। यद्वा त्रीन् धर्मादीन् यापयति निरवकाशीकरोति कामप्रधानत्वात्[32] ।

अथ च विचार्य्यते विरमशब्दविशेषः। प्रकृते विरम इति शब्दः विरमणम् इति अर्थे प्रयुक्तः वर्तते। परन्तु भावे घञ्–प्रत्यये[33] उपधावृद्धौ[34] च विरामः इति भवेत् न तु विरम इति शङ्का जायते। अत्र काञ्चिद्युक्तिं ब्रूमः दृ'कृत्यल्युटो बहुलम्[35]' इति सूत्रे बहुलग्रहणसामर्थ्यात् भावे घञपवादः अप् इति प्रत्ययः वक्तव्यः। अपि प्रत्यये विरम इति सिद्धयति। स्पष्टा च इयं रीतिः यम–उपरमे इत्यादि–धात्वर्थनिर्देशे। न च धात्वर्थनिर्देश आधुनिकः इति चेत् कथं बहुलग्रहणात् घञपवादस्य अपः प्रवृत्तिः प्रदर्श्यते अप्रमाणत्वात् इति वाच्यं, धात्वर्थनिर्देशः पाणिनिनैव अकारीति पक्षान्तरस्यापि सत्त्वात्। दृश्यते च वैद्यके कश्चन प्रयोगः 'फेनोपरमे कल्कद्रव्यं नियोजयेत्[36]' इति। किञ्च सुश्रुते – 'सन्धिगतेऽस्थिवच्चेष्टोपरमश्च[37]' इति।

**नाभिः उत नाभी**

तमवेक्ष्य न दृष्टिरादरादिदमाकाङ्क्षति चित्रमीक्षितुम्।
अलिनीव सरोजकाननं हरिनाभीकमले विलोकिते[38] ॥

तम् अवेक्ष्य हरनाभीकमले विलोकिते सरोजकाननम् अलिनीव दृष्टिः आदरात् इदम् आलेख्यम् ईक्षितुं न आकाङ्क्षति इत्येवम् अन्वयः।

श्लोकेऽस्मिन् हरिनाभीकमले इति प्रयोगे नाभी इति शब्दस्य प्रयोगः कृतः वर्तते। वस्तुतः नाभि इति शब्दः इकारान्तः दृश्यते पुँल्लिङ्गे स्त्रियां च कोशेषु। 'नाभी तुन्दकूपी इति शब्दरत्नावली[39]' इति कल्पद्रुमे उदाहृतं दृश्यते। अत्र जिज्ञासा जायते यत् नाभि इति शब्दात् स्त्रियां कः प्रत्ययः नाभी इति शब्दनिष्पादनाय विधेय इति? वस्तुतः 'कृदिकारादक्तिनः[40]' इत्यादिगणसूत्रेण ङीषा यथा रात्रि

इत्यस्मात् शब्दात् रात्री इत्यपि स्त्रीलिङ्गस्थ एव शब्दः सम्पद्यते तद्वत् नाभि इत्यस्मात् शब्दात् अपि ङीषं विधाय नाभी इत्यस्य ईकारान्तस्त्रीलिङ्गशब्दस्य निर्माणं कर्तुं शक्नुमः। यतोहि नाभि इति शब्दे विद्यमानः इकारः अपि कृदेव। तथाहि णभ–हिंसायाम् इत्यमाद्धातोः 'इणजादिभ्यः[41]' इत्यनेन इण् विधीयते। अयञ्च इण् इति कृत्। अतः उक्तगणसूत्रेण ङीषत्र दुर्वारः। तस्मात् नाभी इति प्रयोगः अपि साधु स्त्रियाम्।

**निष्कर्षः**

अस्मिन् लेखे आहत्य अष्ट विचाराः संकलिताः सन्ति। यद्यपि एतावत्सु एव विचारेषु कवेः कृदन्तपाटवं समग्रं परिचितं न भवति तथापि कवेः कृदन्तप्रयोगपरिपरिपाट्याः परिचयम् अवाप्यध्येता महाकाव्यस्य अस्य रसास्वादनं कर्तुं शक्नोति इति कश्चन प्रयासः। अनेन प्रयासेन काव्यस्य अध्ययने रतानां प्रविष्टव्याकरणानां च नूनम् एव प्रयोजनं भवेत् इति विश्वसिमि।

**सङ्केताक्षरसूचिः –**

अष्टा. = अष्टाध्यायी, वै.सि.कौ. = वैयाकरणसिद्धान्तकौमिदी, च.वि. = चक्रपाणिविजयम्, स. = सर्गः, श्लो.सं. = श्लोकसंख्या, वा. = वार्तिकम्, ग.सू. = गणसूत्रम्, प. = परिभाषा, ल.सि.कौ = लघुसिद्धान्तकौमुदी, म.भा. = महाभाष्यम्, प्र.व्या. = प्रदीपव्याख्या, उद्.व्या. = उद्योतव्याख्या, पृ.सं. = पृष्ठसंख्या, वा = वार्तिकम्, वा.प. = वाचस्पत्यम्, श.क.द्रु. = शब्दकल्पद्रुमः।

**संदर्भ**


1. च.वि. स.१ श्लो.स.१३
2. अष्टा. ३.२.७६
3. वा. २२३३
4. च.वि. स.१ श्लो.स.३३
5. अष्टा. ७.३.३६
6. अष्टा. ३.३.१३६
7. अष्टा. ३.१.११
8. अष्टा. ३.१.३२
9. च.वि. स.१ श्लो.स.४०
10. वा. ५०५९
11. अष्टा. ७.२.१५
12. अष्टा. २.१.२४
13. अष्टा. ७.२.५७
14. अष्टा. ७.२.१४
15. च.वि. स.३ श्लो.स.७
16. अष्टा. ८.२.७
17. अष्टा. ३.३.१९
18. वा. २२०४
19. च.वि. स. ४ श्लो.सं. १७
20. भ्वा.ग. प.प. सेट्
21. उ. १.४१
22. अष्टा. ५.२.३६ - तदस्य सञ्जातं....
23. वा. १७२२
24. अष्टा. ३.१.३२ सनाद्यन्ता ...
25. अष्टा. ३.२.१०२ - 'निष्ठा'
26. च.वि. स.५ श्लो.स.८
27. अष्टा. ३.२.२९'नासिकास्तनयोर्ध्माधेटोः'
28. अष्टा. ३.२.३०'नाडीमुष्ट्योश्च'
29. म.भा. ३.२.२९,३० पृ.सं. - १६६ चौ.प्र.
30. म.भा. ३.२.२९,३० पृ.सं. - १६६ चौ.प्र
31. च.वि. स.६ श्लो.सं. १
32. अ.को. सु.व्या. १.४.४
33. अष्टा. ३.३.१८
34. अष्टा. ७.२.११६
35. अष्टा. ३.३.११३
36. श.क.द्रु.चौ.सं.प्र.वा.पृ.सं.२५९
37. वाच. चौ.सं.प्र.वा.पृ.सं.१२८४
38. च.वि. स.७ श्लो.सं.२९
39. श.क.द्रु. द्वितीय भागः - पृ.सं. ८९१
40. ग.सू. ५०
41. वा. २२३०